# Kanvamaharshina Kritam Ganga Stotram

# कण्वमहर्षिणा कृतं गङ्गास्तोत्रम् ९

## Document Information

Text title : Kanvamaharshina Kritam Ganga Stotram

File name : kaNvamaharShiNAkRRitaMgangAstotram09.itx

Category : devii, devI, nadI, brahmapurANa, stotra

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : brahmapurANa | adhyAya 85/8-14||

Latest update : September 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 28, 2024

*sanskritdocuments.org*

# कण्वमहर्षिणा कृतं गङ्गास्तोत्रम् ९

कण्व उवाच ।
नमोऽस्तु गङ्गे परमार्तिहारिणि नमः क्षुधे सर्वजनार्तिकारिणि ।
नमो महेशानजटोद्भवे शुभे नमो महामृत्युमुखाद्विनिःसृते ॥ ८॥

पुण्यात्मनां शान्तरूपे क्रोधरूपे दुरात्मनाम् ।
सरिद्रूपेण सर्वेषां तापपापापहारिणि ॥ ९॥

क्षुधारूपेण सर्वेषां तापपापप्रदे नमः ।
नमः श्रेयस्करि देवि नमः पापप्रतर्दिनि ।
नमः शान्तिकरि देवि नमो दारिद्र्यनाशिनि ॥ १०॥

ब्रह्मोवाच ।
इत्येवं स्तुवतस्तस्य पुरस्तादभवद्द्वयम् ।
एकं गाङ्गं मनोहारि ह्यपरं भीषणाकृति ।
नमः कृताञ्जलिर्भूत्वा नमस्कृत्वा द्विजोत्तमः ॥ ११॥

कण्व उवाच ।
सर्वमङ्गलमङ्गल्ये ब्राह्मि माहेश्वरि शुभे ।
वैष्णवि त्र्यम्बके देवि गोदावरि नमोऽस्तु ते ॥ १२॥

त्र्यम्बकस्य जटोद्भूते गौतमस्याघनाशिनि ।
सप्तधा सागरं यान्ति गोदावरि नमोऽस्तु ते ॥ १३॥

सर्वपापकृतां पापे धर्मकामार्थनाशिनि ।
दुःखलोभमयि देवि क्षुधे तुभ्यं नमो नमः ॥ १४॥

इति ब्रह्मपुराणे पञ्चाशीत्यध्यायान्तर्गतं
कण्वमहर्षिकृतं गङ्गास्तोत्रं समाप्तम् ।

ब्रह्मपुराण । अध्याय ८५/८-१४॥

brahmapurANa . adhyAya 85/8-14..

Proofread by PSA Easwaran

*Kanvamaharshina Kritam Ganga Stotram*
pdf was typeset on September 28, 2024

Please send corrections to *sanskrit@cheerful.com*